# VISHWAKARMA SUKTAM

**(Krishna Yajurveda - 4.6.2)**

**Vishwakarma** ( विश्वकर्म -"all accomplishing"; "maker of all / all doer") is the personified Omnipotence and the abstract form of the creator God mentioned in the Vedas. Vishwakarma is the indirect form of the *Ultimate reality* (*later developed as Brahman in the Upanishads*) in the Rigveda, from whose navel all visible things emanate (*Hiranyagarbha)*. The same imagery is seen in Yajurveda Purusha Suktam, in which the first born creator *Twashta* emerging from *Virat Purusha Vishwakarma*. Vishwakarma (the invisible creative power) the *Supreme God* who was perceived as a *hotar*, *the unborn* (*Aja*) creator and *name giver of all other gods* who has lot of faces, eyes and feet on every side; and who helps *Twashta* (the visible creative power of Vishwakarma) in producing all the Heavenly, Earthly and other Celestial realms and preserves them through the exercise of his arms and wings. He sacrificed himself to himself for the evolution of this visible world, thus he is *Purusha or Narayana*. Yajurveda pictured him as the *Prajapati* and in the Atharvaveda he is mentioned as *Pasupati*.

He is *Hiranyagharbha* and the creator god mentioned in Naasadiya Suktam. Svethaswathara Upanishad described him as *Rudrasiva*, the one who is residing in the hearts of all the living forms.

Vishwakarma suktam finds mention in the Rigveda (10.81-82), Krishna Yajurveda *(Taittiriya Samhita - 4.6.2; Kathaka Samhita – 18.1,2; Kapisthala Samhita – 1.28.2,3; Maitrayaniya Samhita – 2.10.2.3),* Shukla Yajurveda *(Vajasaneyi Madhyandina Samhita - 17.17-32, Kanwa Samhita – 18.2,3)* and the Atharvaveda (2.35).

य इ॒मा विश्वा॒ भुव॑नानि॒ जुह्व॒दृषि॒र्होता॑ नि॒षसादा॑ पि॒ता नः॑

स आ॒शिषा॒ द्रवि॑णमि॒च्छमा॑नः परम॒च्छदो॒ वर॒ आ वि॑वेश। ॥ १ ॥

ya i̠mā viśvā̠ bhuva̍nāni̠ ju̠hva̠dṛṣi̠rhotā̍ ni̠ṣasādā̍ pi̠tā na̍ḥ
sa ā̠śiṣā̠ dravi̍ṇami̠cchamā̍naḥ parama̠cchado̠ vara̠ ā vi̍veśa।

He who sate down as Hotar-priest, the Rsi, our Father, offering up all things existing,
He, seeking through his wish a great possession, Hath entered into the boon of the first of coverers.

Visvakarman, the Ominific, is represented in this hymn as the universal Father and Generator, the Creator of all things and Architect of the worlds.
*All things existing :* regarded as being contained in the offerings presented by Visvakarman.
*Through his wish:* through his desire to create.

**Sayana's Commentary:-**

प्रथमानुवाके परिषेचनादिकमुक्तम्। अथ द्वितीयानुवाके सूक्ताभ्यां होमा उच्यन्ते।

कल्पः – "षोडशगृहीतेन स्रुचं पूरयित्वा वैश्वकर्माणि जुहोति य इमा विश्वा भुवनानि जुह्वचक्षुषः पिता मनसा हि धीर इति नानासूक्ताभ्यां द्वे आहुती यं कामयेत चिरं पाप्मनो निर्मुच्येतेत्येकैकं तस्येत्युक्तम्" इति।

तत्र प्रथमसूक्ते प्रथमामृचमाह –

य इमा विश्वेति। यो विश्वकर्मा परमेश्वर इमा विश्वा भुवनानि जुह्वत्प्रळयकाले पृथिव्यादीनिमान्सर्वाँल्लोकान्त्वात्मन्याहुतिप्रक्षेपवत्संहरन्नृषिरतीन्द्रियद्रष्टा सर्वज्ञो होता संहार रूपस्य होमस्य कर्ता नोऽस्माकं पिता जनको निषसाद स्वयं स्थितवान् प्रळयकाले प्राप्ते सति सर्वाँल्लोकान्संहृत्यास्माकमपि संहर्ता पुनः स्रष्टा च सन्सर्वज्ञोऽयं परमेश्वरः स्वयमेक एवाऽसीत्।अत एव सर्वा अप्युपनिषद एवमाहुः – "आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्सदेव सोम्येदमग्र आसीत्।एकमेवाद्वितीयम्" इत्याद्याः। स तादृशः परमेश्वर आशिषा बहु स्यां प्रजायेयेत्यवरूपया पुनः सिसृक्षया द्रविणमिच्छमानो धनोपलक्षितं जगद्भोगमपेक्षमाणः परमच्छदः परमं स्वकीयमेवाद्वितीयं परमार्थरूपमावृण्वन्वरे स्वेन सृष्टे शरीरमध्यवर्तिनि पुण्डरीकस्थान आविवेश जीवरूपेण प्रविष्टः। एतच्च सर्वमुपनिषद्याम्नातम् – "सोऽकामयत। बहु स्यां प्रजायेयेति। स तपोऽगच्छत। स तपस्तप्त्वा। इदꣳसर्वमसृजत। यदिदं किंच। तत्सृष्ट्वा। तदेवानुप्राविशात्" इति। एवमन्या अप्युपनिषद उदाहार्याः।

विश्वकर्मा मनसा यद्विहाया धाता विधाता परमोत सन्दृक्

तेषामिष्टानि समिषा मदन्ति यत्र सप्तर्षीन्पर एकमाहुः। ॥२॥

viśvakarmā manasā yadvihāyā dhātā vidhātā paramota sandṛk
teṣāmiṣṭāni samiṣā madanti yatra saptarṣīnpara ekamāhuḥ।

Mighty in mind and power is Vishwakarman, Maker, Disposer, and most lofty Presence.
Their offerings joy in rich juice where they value One, only One, beyond the Seven Rsis.

*Most lofty Presence :* literally, the highest apparition ; the highest image or object of spiritual contemplation.
*Their offerings :* the offerings, or perhaps the wishes, of the Fathers, semi-personified.
*The Seven Rishis:* the constellation Ursa Major, the seven stars of which are the great rishis Martchi, Atri, Angiras, Pulastya, Pulaha, Kratu, and Vasishtha. The meaning is that the spirits of the blest enjoy the fulfilment of all their desires beyond the starry heavens where the One Being, the great Creator, dwells.

**Sayana's Commentary:-**

अथ द्वितीयामृचमाह-

**विश्वकर्मा मनसेति।** विश्वविषयाणि कर्माणि सृष्टिस्थितिसंहाररूपाणि यस्यासौ विश्वकर्मा। तस्य च तेषु कर्मसु सत्यत्वादय एव साधनं सत्यसंकल्पत्वात्। यद्यस्मादयं मनसा संकल्पमात्रेण विश्वकर्मा तस्माद्धाता विधाता विहाया इति चोच्यते। धातोत्पादकः विधाता पोषकः विशेषेण जहाति परित्यजतीति विहायाः। संहार्तेत्यर्थः। उतापि चात एव परमा परमः सर्वेभ्य उत्कृष्टः सम्यक्पश्यतीति संदृक्सर्वज्ञ इत्यर्थः। यत्र यस्मिन्परे परस्मिन्नीश्वरे सप्तर्षीनेकमाहुः, य एते मरीच्यत्रिप्रमुखाःसप्तर्षयो विविधा दृश्यंते यन्ते ते सर्वे सृष्टेः प्राक्परस्मिन्नेकीभूता इति वेदान्तपारगा आहुः। स च परमेश्वरस्तेषां सप्तर्षिप्रभृतीनामिष्टान्यपेक्षितानि स्थानानीषा स्वेच्छामात्रेण संपादयतीति। तेन च ते महर्षयो हृष्यन्ति।

यो नः पिता जनिता यो विधाता यो नः सतो अभ्या सज्जजान

यो देवानां नामधा एक एव तं संप्रश्नम्भुवना यन्त्यन्या। ॥३॥

yo naḥ pitā janitā yo vidhātā yo naḥ sato abhyā sajjajāna
yo devā nāṁ nāmadhā eka eva taṁ sampraśnambhuvanā yantyanyā।

He who is our father, our begetter, the ordainer,
Who begot us from being unto being ,
Who alone assigneth their names to the gods,
Him other beings approach for knowledge.

*For information :* to learn who is the Supreme God ; or what their several functions are.

This verse also occurs in Atharvaveda and Taittiriya Aranyaka:

**Atharvaveda – 2.1.3**

स नः पिता जनिता स उत बन्धुर्धामानि वेद भुवनानि विश्वा।

यो देवानां नामध एक एव तं संप्रश्नं भुवना यन्ति सर्वा॥

sa naḥ pitā janitā sa uta bandhurdhāmāni veda bhuvanāni viśvā।
yo devānāṁ nāmadha eka eva taṁ saṁpraśnaṁ bhuvanā yanti sarvā।।
He is our kinsman, father, and begetter: he knows all beings and all Ordinances.
He only gave the Gods their appellations: all creatures go to him to ask direction.

**Taittiriya Aranyaka - 10.1.4**

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।

sa no bandhurjanitā sa vidhātā dhāmāni veda bhuvanāni viśvā।
He is our kinsman, father, and begetter: he knows all beings and all Ordinances.

**Sayana's Commentary:-**

अथ तृतीयामृचमाह।

**यो नः पितेति।** यो विश्वकर्मा नोऽस्माकं पिता पालयिता न केवलं पालक उत्पादकोऽपि।

किमनेनास्माकमुत्पादक इति संकोचेन, यो विधाता सर्वस्य जगत उत्पादको यो विश्वकर्मा

नोऽस्माकमुत्पन्नानां सद्वर्तमानमिदं भोग्यजातं सतो जजान तदेव

सोम्येतिश्चत्युक्तात्स्वरूपादुत्पादयामास।

यश्च विश्वकर्मा देवानां नामधाः स्वयमेव सर्वदेवरूपेणाऽऽविर्भूयेन्द्रामित्रादिदेवतानामानि धारयति। अत एवान्यत्राऽऽम्नातम्। “इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्। एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः” इति। अत एव बहुनां देवानां नामानि धारयन्नपि वस्तुतः त्वयमेक एव, तं विश्वकर्माणं परमेश्वरमन्या भुवना तस्मादन्यानि सृष्टानि सर्वाणि भुवनानि संप्रश्नं यथा भवति तथा यन्ति प्रळयकाल एकत्वं प्राप्नुवन्ति। एकीभावयुक्ते प्रळये क ईश्वरः कानि भुवनानीत्येवं प्रश्नः। संप्रधारणं प्रवर्तते। विभागाभावेन श्रुत्यनभिज्ञे ज्ञांतुमशक्यत्वात्।

त आय॑जन्त॒ द्रवि॑णꣳ सम॑स्मा॒ ऋष॑यः॒ पूर्वे॑ जरि॒तारो॒ न भू॒ना
अ॒सूर्ता॒ सूर्ता॒ रज॑सो वि॒माने॒ ये भू॒तानि॑ स॒मकृ॑ण्वन्नि॒मानि॑। ॥४॥

ta āya̍janta̱ dravi̍ṇam̐ sama̍smā̱ ṛṣa̍ya̱ḥ pūrve̍ jari̱tāro̱ na bhū̱nā
a̱sūrtā̱ sūrtā̱ raja̍so vi̱māne̱ ye bhū̱tāni̍ sa̱makṛ̍ṇvanni̱māni̍|

To him in sacrifice they offered treasures,
The Rishis of old like singers in abundance,
They who fashioned these beings illumined and unillumined
In the expense of space.

**Sayana's Commentary:-**

अथ चतुर्थीमृचमाह-

त आऽयजन्तेति। पूर्वोदाहृतेन विश्वकर्मणा प्रधममुत्पादिता ये स्त्रष्टार इमानि भूतानि सर्वानेतान्प्राणिनः समकृण्वन्सम्यगुप्यादितवन्तः, ते पूर्वे स्त्रष्टारौऽस्मै सृष्टाय जगते द्रविणं धनरूपं भोग्यजातं समायजन्त सम्यक्संपादितवन्तः।कीदृशास्ते, ऋषयोऽतीन्द्रियद्रष्टारः। सर्वज्ञा इत्यर्थः। जरितारोनभूना स्वकीयेन महत्वेन कदाचिदपि जीर्णा न भवन्ति। कीदृशानि भूतानि, असूर्ताऽसुभिः प्राणैरीरितानि प्राणयुक्तानीत्यर्थः। तथा रजसो विमाने सूर्ता रन्जनात्मकस्य विशेषेण प्रमितौ स्वस्यकर्मभिः सुष्ठु प्रेरितानि।

न तं विदाथ य इदं जजानान्यद्युष्माकमन्तरम्भवाति

नीहारेण प्रावृता जल्प्या चासुतृप उक्थशासश्चरन्ति। ॥५॥

na taṁ vidātha ya idaṁ jajānānyadyuṣmākamantarambhavāti
nīhāreṇa prāvṛtā jalpyā cāsutṛpa ukthaśāsaścaranti।

Ye will not find him who produced this world; another thing hath risen up among you.
Enwrapt in misty cloud, with lips that stammer, hymn-chanters wander and are discontented.

**Sayana's Commentary:-**

न तं विदाथेति। यो विश्वकर्मैव जजानोत्पादितवान्तं विश्वकर्माणं स विदाथ तेन सृष्टा हे जीवा यूयं न जानीथ। देवदत्तोऽह यज्ञदत्तोऽहमित्येवं सर्वेऽपि वयमात्मानं विश्वकर्माणं जानीम इति यद्युच्येत तदसत्। न ह्यहंप्रत्ययगम्यं जीवरूपं विश्वकर्मणः परमेश्वरस्य किंतु युष्माकमहंप्रत्ययगम्यादतिरिक्तं सर्ववेदान्तवेद्यमीश्वरतत्वं भवाति विद्यते। तथाऽपि जीवरूपवत्कुतो न जानीथ इति चेत्। नीहारेण प्रावृता भवन्तो नीहारसदृशेनाज्ञानेनाऽऽवृतत्वान्नजानन्ति। यथा नीहारो नात्यन्तमसत्। दृष्टेरावरकश्चात्। नाप्यत्यन्तं सत्। काष्ठपाषाणादिरूपान्तरेण संबद्धमयोग्यत्वात्। एवमज्ञानमपि नात्यन्तमसदीश्वरतत्वावरकत्वात्। नापि सद्बोधमात्रनिवर्त्येत्वात्। ईदृशेनानिर्वचनीयेनाज्ञानेन भवन्तः सर्वे जीवाः प्रावृता। न केवलं तत्वं (न जानन्तः) किंतु जल्प्या च देवोहं मनुष्योऽहं ममेदं क्षेत्रमित्याद्यनृतजल्पनपराश्च। किंचासुतृपः, असुनुतृप्यन्तीत्यसुतृपः, केनापि प्रकारेण प्राणान्पोषयित्वा तावतैव तृप्यन्ति भवन्तो न तु परमेश्वरतत्वं विचारयितुं प्रवर्तन्ते। न केवलमिह लोके भोगमात्रतृप्तिः। किंतूक्थशासः परलोकेऽपि भोगं संपादयितुं नानाविधेषु यज्ञेषूक्थानि शस्त्राणि शंसन्तीत्युक्थशासः। तादृशा भूत्वा भवन्तश्चरन्ति, ऐहिकामुष्मिकभोगे सर्वदा प्रवर्तन्ते। तस्मादज्ञानमिथ्याज्ञानपराधीनानां भवतां नास्ति तत्वज्ञानमित्यर्थः।

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्गुहा यत्।

कꣳ स्विद्गर्भं प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे॥ ॥६॥

paro divā para enā pṛthivyā paro devebhirasurairguhā yat
kaṁ̐ svidgarbhaṁ prathamaṁ dadhra āpo yatra devāḥ samagacchanta viśve।

That which is earlier than this earth and heaven,
Beyond the gods, what is secret from the Asuras,
What was the germ primeval which the waters received,
Where all the Gods were gathered all together?

**Sayana's Commentary:-**

अथ षष्ठीमृचमाह –

परोदिवेति। यदीश्वरतत्वं गुहा हृदयपुण्डरीके गूढं दिवा परो द्युलोकादपि दूरे तिष्ठति, एना पृथिव्या परोऽस्याः पृथिव्या दूरे तिष्ठति, देवेभिरसुरैः परो देवेभ्योऽसुरेभ्यश्च दूरे तिष्ठति। सकारान्तः परः शब्दो दूरवाची। दूरत्वं नाम विलक्षणत्वम्। सर्वजगद्विलक्षणत्वाद्गुरुशास्त्रविमुखैर्ज्ञायत इत्यर्थः। किंच यत्र यस्मिन्गर्भे विश्वे सर्वेऽपि देवाः समगच्छन्त संगताः संभूय वर्तन्ते, तं कंस्विद्गर्भमापः प्रथमं दद्रे। अद्भिः पूर्वं धृते गर्भे देवमनुष्यादयः सर्वे प्राणिनो वर्तन्त इत्येवं शास्त्रप्रसिद्धिः। सोऽपि गर्भः क इति न ज्ञायते। यदा स्थूलोऽप्ययं जगदाधारो न ज्ञातस्तदाऽत्यन्तसूक्ष्मतत्वं न ज्ञायत इति किमुवक्तव्यमित्यभिप्रायः। अथ सप्तमीमृचमाह।

तमिद्गर्भम्प्रथमं दध्र आपो यत्र देवाः समगच्छन्त विश्वे

अजस्य नाभावध्येकमर्पितं यस्मिन्निदं विश्वम्भुवनमधि श्रितम्। ॥७॥

tamidgarbhamprathamaṁ dadhra āpo yatra devāḥ samagacchanta viśve
ajasya nābhāvadhyekamarpitaṁ yasminnidaṁ viśvambhuvanamadhi śritam।

The waters, they received that germ primeval Where all the Gods were gathered all together;
It rested set upon the Unborn's navel, On which doth rest all this world.

**Sayana's Commentary:-**

अथ सप्तमीमृचमाह।

तमिद्गर्भं प्रथममिति। इदानीं गुरुशास्त्रानुशासनोपेतेषु पुरुषेषु विद्यमानस्तुतिरनयाऽभिधीयते - यत्र यस्मिन्ब्रह्माण्डगर्भे विश्वे देवाः समगच्छन्त तमित्तमेव गर्भमापः प्रथमं दध्रे धृतवत्यः। तद्धारणप्रकार एव सृष्टी क्रियते - अजस्य जन्मरहितस्य परमेश्वरतत्त्वस्य नाभौ नाभिस्थानीये स्वरूपमध्य एकं किंचिद्बीजमध्यर्पितमधिकत्वेन स्थापितं यस्मिन्बीज इदं विश्वं सर्वमपि भुवनमधिश्रितमधिकत्वेन स्थापितं तद्बीजमर्पितम्। तथा च स्मर्यते -

अप एव ससर्जाऽऽदौ तासु वीर्यमपासृजत्।

तदण्डमभवद्धैमं कोटिसूर्यसमप्रभम् ॥ इति।

वि॒श्वक॑र्मा॒ ह्यज॑निष्ट दे॒व आदिद्ग॑न्ध॒र्वो अ॑भवद्द्वि॒तीय॑ः

तृ॒तीय॑ः पि॒ता ज॑नि॒तौष॑धीनाम॒पां गर्भं॒ व्य॑दधात्पुरु॒त्रा। ॥८॥

viśvakarmā hyajaniṣṭa deva ādidgandharvo abhavaddvitīyaḥ
tṛtīyaḥ pitā janitauṣadhīnāmapāṁ garbhaṁ vyadadhātpurutrā।

First was the God engendered, Vishwakarman; then the Gandharva sprang to life as second.
Third in succession was the father, begetter of plants; In many a place did he deposit the germ of the waters.

*The Gandharva :* the Sun, that is, Agni.
*The plants' begetter:* Parjanya, the God of the Rain cloud.

**Sayana's Commentary:-**

अथाष्टमीमृचमाह -

विश्वकर्मेति। ब्रह्माण्डगतानामुत्पत्तिरुच्यते - अण्डमध्ये प्रथमं विश्वकर्मा देवतिर्यगादिविश्वभेदस्य कर्ता सत्यलोकनिवासी चतुर्मुखो देवोऽजनिष्टोत्पन्नः। आदिदनन्तरमेव तदपेक्षया द्वितीयो गन्धर्वोऽभवदुत्पन्नः। तत ऊर्ध्वमोषधीनां पिता पालको जनितो + त्पादकः सोमः पूर्वोक्तद्यपेक्षया तृतीयोऽभवत्। तदेवमपां गर्भं ब्रह्माण्डं परमेश्वरः पुरुत्रा व्यदधाद्बहुधा व्यक्तं कृतवान्। इत्थमेकं सूक्तं समाप्तम्।

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नंनमाने

यदेदन्ता अदद्दृंहन्त पूर्व आदिद्यावापृथिवी अप्रथेताम्।          ॥ ९ ॥

cakṣuṣaḥ pitā manasā hi dhīro ghṛtamene ajanannaṁnamāne
yadedantā adadṛṁhanta pūrva ādiddyāvāpṛthivī aprathetām ।

The Father of the eye, the Wise in spirit, created both these worlds submerged in fatness.
Then when the eastern ends were firmly fastened, the heavens and the earth were far extended.

*The father of the eye :* Visvakarman, who made the light which enables the eye to see. *Submerged in fatness :* Sayana explains *ghritam* here hy 'water :' — 'engendered the water, (and then) these two (heaven and earth) floating (on the waters).' — Wilson.

**Sayana's Commentary:-**

अथ द्वितीयसूक्ते प्रथमामृचमाह-

चक्षुषः पितेति। चक्षुषश्चक्षुरादेः प्राणसमुदायस्य पितोत्पादको धीरो धैर्यवान्। मनसा स्वेच्छया घृतं घृतवत्पाणिनामुपभोगसाधनभूते एने द्यावापृथिव्यौ परस्परानुकूल्येन नन्नमाने नमनोपेते अजनदुत्पादितवान्। यदेद्यदैवपूर्वे प्रथमा अन्ता अननयुक्ताश्लेष्टावन्तश्चक्षुरादिप्राणा अदद्दृंहन्त दृढा अभवन्। आदिदनन्तरमेव द्यावापृथिवी अप्रथेतां द्यावापृथिव्यौ विस्तृते अभूताम्।

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्

सम्बाहुभ्यां नमति सम्पतत्रैर्द्यावापृथिवी जनयन्देव एकः।          ॥ १० ॥

viśvataścakṣuruta viśvatomukho viśvatohasta uta viśvataspāt
sambāhubhyāṁ namati sampatatrairdyāvāpṛthivī janayandeva ekaḥ ।

With eyes on every side, with a face on every side, With hands on every side, with feet on every side,
He, the Sole God, producing earth and heaven, weldeth them, with his arms as wings, together.

*Weldeth them*: Cf. R.V. IV. 2. 17; X. 72.2.
*With his arms as wings* : fanning the flame in which the matter is smelted. Ludwig thinks that whirlwinds, produced by the action of hands, feet, and wings, are intended.

This verse also occurs in Atharvaveda and Taittiriya Aranyaka :

**Atharvaveda – 13.2.26**

यो विश्वचर्षणिरुत विश्वतोमुखो यो विश्वतस्पाणिरुत विश्वतस्पृथः।

सं बाहुभ्यां भरति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः॥

yo viśvacarṣaṇiruta viśvatomukho yo viśvataspāṇiruta viśvataspṛthaḥ।
saṁ bāhubhyāṁ bharati saṁ patatrairdyāvāpṛthivī janayandeva ekaḥ।।

Dear unto all men, facing all directions, with hands and palms on every side extended, He, the sole God, engendering earth and heaven, bears them with his wings and arms together.

**Taittiriya Aranyaka – 10.1.3**

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्

सम्बाहुभ्यां नमति सम्पतत्रैर्द्यावापृथिवी जनयन्देव एकः।

viśvataścakṣuruta viśvatomukho viśvatohasta uta viśvataspāt sambāhubhyāṁ namati sampatatrairdyāvāpṛthivī janayandeva ekaḥ।

With eyes on every side, with a face on every side, With hands on every side, with feet on every side,
He, the Sole God, producing earth and heaven, weldeth them, with his arms as wings, together.

**Sayana's Commentary:-**

अथद्वितीयामृचमाह-

विश्वतश्चक्षुरिति। चक्षुरादिप्राणानं द्यावापृथिव्योश्चोत्पत्तेरूर्ध्वं विश्वरूपधरः परमेश्वर एवं भासते। कथमिति तदुच्यते—विश्वतः सर्वतश्चक्षूंषि यस्यासौ विश्वतश्चक्षुः। परमेश्वरस्य सर्वप्राण्यात्मकत्वाद्यस्य प्राणिनो ये चक्षुषी ते तदुपाधिकस्य परमेश्वरस्यैवेति सर्वत्रास्य चक्षूंषि संपाद्यन्ते। एवं मुखहस्तपादेष्वपि योजनीयम्।स तादृश एको देवो द्यावापृथिवी जनयन्बाहुभ्यां बाहुस्थानिभ्यां धर्माधर्माभ्यां निमित्तकारणाभ्यां संनमति जगत्सर्वं सम्यङ्गतं स्वाधीनं करोति। तथा पतत्रैः पतनशीलैरनीत्यैः पञ्चभूतैरुपादानकारणैः संनमदि जगत्स्वाधीनं करोति।

किं॑ स्वि॒दासी॑दधि॒ष्ठान॑मा॒रम्भ॑णं कत॒मत्स्वि॒त्किमा॑सीत्

यदी॒ भूमिं॑ ज॒नय॑न्वि॒श्वक॑र्मा॒ वि द्यामौर्णो॑न्महि॒ना वि॒श्वच॑क्षाः। ॥ ११ ॥

kiṁ svidāsīdadhiṣṭānamārambhaṇaṁ katamatsvitkimāsīt
yadī bhūmiṁ janayanviśvakarmā vi dyāmaurṇonmahinā viśvacakṣāḥ।

What was the place whereon he took his station? What was it that supported him? How was it?
When producing earth Vishwakarman, all-seeing, with mighty power disclosed the heavens.

**Sayana's Commentary:-**

अथ तृतीयामृचमाह--

किंस्विदासीदिति। लोके हि चिकीर्षुः कुलालो गृहादिकं किंचित्स्थानमधिष्ठाय मृद्द्व्येण चकादिरूपैरुपकरणसाधनैर्घटं निष्पादयति। ईश्वरस्य निरपेक्षत्वात्सर्वमत्राऽऽक्षिप्यते— द्यावापृथिव्योरुत्पादनवेळायामीश्वरस्याधिष्ठानं निवासस्थानं किंस्विदासीत्किं नामाभूतेन किंचिदित्यर्थः। तथाऽऽरम्भणं कतमत्स्वित्किमासीत्। आरभ्यतेऽनेनेत्यारम्भणमुपादानकारणं, तदपि कतमद्भवेत्। नहि द्यावापृथिव्यौ जनयितुं समर्धं किंचिदुपादानं संभवति। तथा दण्डचक्रादिकन्निमित्तमपि किमासीन्न किंचित्संभवतीत्यर्थः। विश्वचक्षाः सर्वद्रष्टा विश्वकर्मा यदि यस्मिन्काले भूमिं भूलोकं जनयन्वर्तते तस्मिन्काले हि महिना महिन्मवै साधनान्तरं विनैव विशेषेण द्यामौर्णोत्सृष्ट्वा द्यावापृथिव्याषाच्छादितवान्। अचिन्त्यशक्तिरयं परमेश्वरः।

किं॑ स्वि॒द्वनं॒ क उ॒ स वृ॒क्ष आ॑सी॒द्यतो॒ द्यावा॑पृथि॒वी नि॑ष्टत॒क्षुः

मनी॑षिणो॒ मन॑सा पृ॒च्छतेदु॒ तद्यद॒ध्यति॑ष्ठ॒द्भुव॑नानि धा॒रय॑न्। ॥ १२ ॥

kiṁ svidvanaṁ ka u sa vṛkṣa āsīdyato dyāvāpṛthivī niṣṭatakṣuḥ
manīṣiṇo manasā pṛcchatedu tadyadadhyatiṣṭhadbhuvanāni dhārayan।

What was the tree, what the wood, from which they fashioned out the earth and heaven?
Ye thoughtful men inquire within your spirit whereon he stood when he established all things.

*They* : the makers of the world directed by Parameswara. - Sayana.
The answer to the adove verse can be found in **Taittiriya Brahmana - 2.8.9.76, 77** which emphasizes that Vishwakarman is Brahman, he was the wood and he was the tree when the first born creators – the ancient sages (Sanaga, Sanathana, Ahabhuna, Prathna and Suparna) directed by the Supreme God, fashioned out the heaven and the earth. It was on himself that he stood as he supported the worlds. Sayana also mentioned this in his commentary.

किँस्विद्वनं क उ स वृक्ष आसीत्।

यतो द्यावापृथिवी निष्टतक्षुः।

मनीषिणो मनसा पृच्छतेदु तत्।

यदध्यतिष्ठद्भुवनानि धारयन्।

kiṁsvidvanaṁ ka u sa vṛkṣa āsīt।
yato dyāvāpṛthivī niṣṭatakṣuḥ।
manīṣiṇo manasā pṛcchatedu tat।
yadadhyatiṣṭhadbhuvanāni dhārayan।
What was the wood, and what the tree,
Whence they formed sky and earth?
O ye wise ones, inquire with your minds
On what he stood as he supported the worlds.

ब्रह्म वनं ब्रह्म स वृक्ष आसीत्।

यतो द्यावापृथिवी निष्टतक्षुः।

मनीषिणो मनसा विब्रवीमि वः।

ब्रह्माध्यतिष्ठद्भुवनानि धारयन्।

brahma vanaṁ brahma sa vṛkṣa āsīt।
yato dyāvāpṛthivī niṣṭatakṣuḥ।
manīṣiṇo manasā vibravīmi vaḥ।
brahmādhyatiṣṭhadbhuvanāni dhārayan।
The Brahman was the wood, the Brahman was the tree when they fashioned out the heaven and the earth. O wise ones, I declare it to you with intention: it was on the Brahman that he stood as he supported the worlds.

**Sayana's Commentary:-**

अथ चतुर्थीमृचमाह--

किंस्विद्वनमिति। लोके हि प्रौढं प्रासादं निर्मिमाप्यः कस्मिंश्चित्प्रौडे वने किंचिन्महान्तं वृक्षं छित्वा तक्षणादिना काष्ठैः प्रासादमुच्चैस्तरं संपादयति। इह तु परमेश्वरो जगत्सृष्टिं यतो यस्माद्वनाद्यं वृक्षमादाय द्यावापृथिवी निष्टतक्षुस्तक्षणेन द्यावापृथिव्यौ निष्पादितवास्तद्वनं किंस्वित्किंनाम स्यान्न किंचिताद्दशं संभवति। तथा क उ स वृक्षस्ताद्दशः स प्रौडवृक्षोऽपि कः स्यान्न कश्चित्संभवति। हे मनीषिणो विद्वांसो मनसा स्वकीयेन विचिन्त्य पृच्छतेदिदं सर्वं पृच्छतैव। किंचेश्वरो भुवनानि धारयन्यदध्यतिष्ठद्यत्स्थानमथिष्ठितवांस्तदपि स्थानं सर्वथा पृच्छत। एतस्य प्रश्नस्य सर्वस्याप्युत्तरं ब्राह्मणग्रन्थे सूक्तप्रपाटके ब्रह्म वनं ब्रह्म स वृक्ष आसीदित्येतस्यामृच्याम्नातम्। स्वरूपव्यतिरिक्तवस्त्वादिनिरपेक्षत्वमेवास्योत्तरस्याभिप्रायः।अतोऽत्रापि किंस्विद्वनमित्याद्याक्षेपरत्वेनैव योजितम्। पृच्छतेदित्यस्याप्ययमभिप्रायः। भवद्भिः पृष्टेऽपि निरपेक्षत्वमेवाभिज्ञा वदिष्यन्तीति।

या ते धामा॑नि पर॒माणि॒ याव॒मा या म॑ध्य॒मा वि॑श्वकर्मन्नु॒तेमा
शिक्षा॒ सखि॑भ्यो ह॒विषि॑ स्वधावः स्व॒यं य॑जस्व त॒नुवं॑ जुषा॒णः। ॥१३॥

yā te̠ dhāmāni para̠māṇi̠ yāva̠mā yā madhya̠mā viśvakarma̠nnu̠temā
śikṣā̠ sakhibhyo ha̠viṣi̠ svadhāvaḥ sva̠yaṁ yajasva ta̠nuvaṁ juṣā̠ṇaḥ|

Thine highest, lowest, sacrificial natures, and these thy mid-most here, O Vishwakarman,
Teach thou thy friends at sacrifice,
O faithful one, Do thou thyself sacrifice to thyself, rejoicing.

Exhilarated, thyself offer up thyself.' — Muir.
'Do thou sacrifice to thyself delighting thyself.' — Wallis.
' According to Mahidhara the meaning is that man is incompetent to worship the creator, that is, in his forms, and it must be done by himself.'— Wilson.

**Sayana’s Commentary:-**

अथ पञ्चमीमृचमाह—

या ते धामानिति। हे विश्वकर्मंस्ते त्वदीयानि परमाणि यानि धामन्युत्कृष्ठानि सन्ति, यानि मध्यमान्यवमानि च धामानि स्थानानि सन्ति, तानीमानि सर्वाणि स्थानानि सखिभ्यः सखिवत्प्रियेभ्यो हविषि हविष्प्रदाननिमित्तं शिक्षोपदिश। हे स्वधावः स्वधोपलक्षितहविर्लक्षणान्नवन्विश्वकर्मंस्तनुवं जुषाणो यजमानशरीरं सेवमानः स्वयं यजस्व त्वदनुग्रहमन्तरेण को वाऽन्यो यष्टुं शक्त इत्यर्थः।

वाचस्पतिं विश्वकर्माणमूतये मनोयुजं वाजे अद्या हुवेम
स नो नेदिष्ठा हवनानि जोषते विश्वशम्भूरवसे साधुकर्मा। ॥१४॥

vācaspatiṁ viśvakarmāṇamūtaye manoyujaṁ vāje adyā huvema
sa no nediṣṭhā havanāni joṣate viśvaśambhūravase sādhukarmā।

The lord of speech, Vishwakarman,
Let us invoke this day to aid us , thought yoked for strength,
May he delight in our nearest offerings,
He with all healing, to aid (us), the doer of good deeds.

**Sayana’s Commentary:-**

अथ षष्ठीमृचमाह--

वाचस्पतिमिति। विश्वकर्माणं परमेश्वरमद्यास्मिन्दिने वाजोऽन्ने निमित्तभूते सति ऊतये रक्षणाय हुवेमाऽऽह्वयाम। कीदृशां विश्वकर्माणम् , वाचस्पतिं मन्त्ररूपाया वाचः पालकं कर्मण्यस्मन्मनसो योजयितारम्। स विश्वकर्मानोऽस्मदीयानि नेदिष्ठान्यत्यन्तसमीपवर्तीनि हवनानि हवींष्याह्वानानि वा जोषते सेवते। किमर्थम् , अवसेऽस्मानवितुं रक्षितुम्। कीदृशः सः, विश्वशंभूः सर्वस्मिञ्जगति सुखस्य भावयिता साधुकर्माऽस्मदनुकूलव्यव्यापारवान्।

विश्वकर्मन्हविषा वावृधानः स्वयं यजस्व तनुवं जुषाणः

मुह्यन्त्वन्ये अभितः सपत्ना इहास्माकम्मघवा सूरिरस्तु। ॥ १५ ॥

viśvakarmanhaviṣā vāvṛdhānaḥ svayaṁ yajasva tanuvaṁ juṣāṇaḥ
muhyantvanye abhitaḥ sapatnā ihāsmākammaghavā sūrirastu।

O Vishwakarman, waxing great with the oblation,
Do thou thyself sacrifice to thyself rejoicing;
May the others around, our foes, be confused;
May our patrons here be rich.

**Sayana's Commentary:-**

अथ सप्तमीमृचमाह।

विश्वकर्मन्निति। हे विश्वकर्मन्नस्मदीयेन हविषा वावृधानोऽतिशयेन वर्धमानस्तनुवं जुषाणः शरीरं स्वीकुर्वाणः स्वयं यजस्व, अस्मत्तोऽन्ये सपत्ना इह कर्मणि मुह्यन्तु भ्रान्ता भवन्तु। अस्माकं तु मघवाऽन्नयुक्तः सूरिर्विद्वान्पुत्रोऽस्तु।

विश्वकर्मन्हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवध्यम्

तस्मै विशः समनमन्त पूर्वीरयमुग्रो विहव्यो यथासत्। ॥ १६ ॥

viśvakarmanhaviṣā vardhanena trātāramindramakṛṇoravadhyam
tasmai viśaḥ samanamanta pūrvīrayamugro vihavyo yathāsat।

With strengthening libation, Vishwakarman, thou madest Indra an undying guardian. The people of old time bowed down before him because the Mighty One was meet for worship.

**Sayana's Commentary:-**

अथाष्टमीमृचमाह--

विश्वकर्मन्हविषेति। हे विश्वकर्मन्नस्मदीयेन हविषा त्वं वर्धनेन युक्तं इमं यजमानं त्रातारमन्येषां रक्षकमिन्द्रं परमेश्वर्योपेतमवध्यं केनापि हिंसितुमशक्यमकृणोः कुरु। तस्मै यजमानाय पूर्वं विशः पूर्वीर्विशो वृद्धया वितत्यमानाः प्रजाः समवन्त सम्यञ्चता एतदधीना भवन्तु। अयं यजमान

उग्रस्तीव्रशक्तिः सन्केनाप्यपरिभूतो विहव्यो विविधयागयोग्यो यथाऽसद्यथा भवति तथा कुरु। कल्पः—"यद्येनमुदकेऽभिविन्देदुदकाञ्जलिमादाय समुद्राय वयुनायेत्यप्सुजुहुयादिति अयज्ञसंयुक्तः कल्पः" इति।

समुद्राय वयुनाय सिन्धूनाम्पतये नमः
नदीनाꣳ सर्वासाम्पित्रे जुहुता
विश्वकर्मणे विश्वाहामर्त्यꣳ हविः। ॥१७॥

samudrāya vayunāya sindhūnāmpataye namaḥ
nadīnām̐ sarvāsāmpitre juhutā
viśvakarmaṇe viśvāhāmartyam̐ haviḥ।

To the ocean, the moving,
The lord of Sindhu and other streams, homage!
To the lord of all the streams
Do ye offer, to Vishwakarman,
Through all the days the immortal offering.

**Sayana's Commentary:-**

पाठस्तु—

समुद्रायेति। यो विश्वकर्मा समुद्ररूपेणावतीर्णस्तस्मै समुद्राय नमोऽस्तु। कीदृशाय, वयुनाय कान्ताय सिन्धूनां पतये स्यन्दमानानां भर्षे। समुद्राकारेण भर्ता विश्वकर्माकारेण सर्वासां नदीनां पितोत्पादकः। तादृशाय विश्वकर्मणे हे ऋत्विग्यजमाना विश्वाऽहा सर्वाण्यहानि निरन्तरमित्यर्थः। अमर्त्यमविनश्वरं हविर्जुहुत।